आचार्य-वसुबन्धु-प्रणीतः

# अभिधर्मकोशः

महापण्डित-राहुल-सांकृत्यायन-विरचितया

नालन्दिकाभिधया टीकया परिशिष्टादिना च सहितः



सम्पादकः

संघसेनसिंहः

राष्ट्रियसंस्कृतसंस्थानम्

नवदेहली

# पुरोवाक्

अभिधर्मकोशो बौद्धवाङ्मये महत्त्वपूर्णो ग्रन्थः। आचार्यवसुबन्धुरस्य प्रणेता। तेन सर्वास्तिवादिनां वैभाषिकमतस्य सम्पोषणाय अयं ग्रन्थः कृत इति विद्वांसः स्वीकुर्वन्ति। अस्मिन् विषये ग्रन्थकारेण स्वयमेव ग्रन्थस्य पुष्पिकायां लिखितं यत् 'काश्मीरवैभाषिकनीतिसिद्धः प्रायो ममायं कथितोऽभिधर्म इति। अस्य ग्रन्थस्य आश्रयोऽभूत् महाविभाषानाम्नी आर्यकात्यायनीपुत्रकृतज्ञान-प्रस्थानशास्त्रस्योपरि कृता टीका, याम् आश्रित्य कुषाणमहाराजकनिष्कस्य काले एका सङ्गीतिः समायोजिता, काश्मीरके कुण्डलग्रामे पाञ्चनदके जालन्धरे वा। एतस्या घटनाया महत्त्वम् अनेनैव अनुमीयते यत् तस्यां सङ्गीत्यां विहितां विभाषाम् आधृत्य सर्वास्तिवादिषु वैभाषिक-सौत्रान्तिकमतद्वयं प्रकटितम्।

आचार्यवसुबन्धुः गान्धारराष्ट्रे पुरुषपुरनगरे कौशिकान्वये ब्राह्मणवंशे जनिम् अलभदिति बौद्धेषु प्रसिद्धिः। स आचार्यस्य असङ्गस्य कनिष्ठो भ्रातासीदिति बहुभिः विद्वद्भिः स्वीक्रियते। आचार्योऽसङ्गो योगाचार-विज्ञानवादस्य प्रवर्त्तकोऽभूदिति ज्ञायते। आचार्यवसुबन्धोर्विषये एषापि प्रसिद्धिः वर्तते यत्स स्वज्येष्ठभ्रातुरादेशनया सर्वास्तिवादं परित्यज्य महायानं स्वीचकार। किन्तु तत्तु शङ्कास्पदमिति राहुलसांकृत्यायनप्रमुखा अनेके बौद्धविद्यामर्मज्ञाः कथयन्ति। योगाचार-विज्ञानवादेऽपि वसुबन्धोर्विंशिकात्रिंशतिकेत्यादय अनेके ग्रन्थाः प्रसिद्धाः।

चीनत्रिपिटके वसुबन्धुकर्तृत्वमाधृत्य षट्त्रिंशत् ग्रन्थाः प्राप्यन्ते। तत्र वसुबन्धुनामका आचार्या अपि षट्। तत्र किं कस्येति निश्चयो दुष्कर इति शङ्कां दृढयति महापण्डितो राहुलसांकृत्यायनः।

परमार्थनामधेयेन भारतीयमूलकेन चीनभाषानुवादकेन चीनभाषायां वसुबन्धुचरितं लिखितम्। तत्र स कथयति यत् काश्मीरवैभाषिकैरनुयाच्यमान आचार्यवसुबन्धुः स्वयमेव अभिधर्मकोशभाष्यं प्रणिनाय।

मध्यकालिके भारते सर्वत्र अभिधर्मकोशस्य प्रचार आसीत् न केवलं बौद्धेषु अपितु अन्येष्वपि धर्मावलम्बिषु। महाकविबाणयुगे अस्य ग्रन्थस्य कियती प्रसिद्धिरासीदिति हर्षचरिते तदुक्त्या प्रतीयते। तत्र स्पष्टम् उल्लिखितम्- 'शुकैरपि शाक्यशासनकुशलैः कोशं समुपदिशद्भिरिति। अस्मिन् प्रसङ्गे तट्टीकाकारेण शङ्करकविना उक्तम्- 'कोशो बुद्धसिद्धान्तो वसुबन्धुकृत' इति। अन्येषु देशेष्वपि तथैव प्रचारोऽस्य ग्रन्थस्येति सिंहलकवि-श्रीराहुलसङ्घराजकृते मोग्गल्लानपञ्चिकाप्रदीपेति नामके ग्रन्थे अभिधर्मकारिकाया उद्धरणेन प्रमाणीक्रियते।

चीनभोटभाषासु अभिधर्मकोशसम्बन्धिग्रन्थानां सङ्ख्या बह्व्यः। अद्यतने काले पाश्चात्यदेशेष्वपि अनेकैः विद्वद्भिः अस्य अध्ययनं कृतम्। फ्रांसदेशीयेन लॉ वेले पुषें महादयेन चीनभोटभाषान्तरगतानां ग्रन्थानां साहाय्येन अस्य ग्रन्थस्य गहनम् अध्ययनं कृतम्। तेन षट्खण्डीयो महान् ग्रन्थोऽपि प्रकाशितः। महापण्डितेन राहुलेन तमाधृत्य खण्डितानां अभिधर्मकोशकारिकाणामुद्धारः कृतः (द्रष्टव्यं तल्लिखितं संज्ञापनम्)। तद्ग्रन्थसाहाय्येनैव महापण्डितेन नालन्दिका नाम्नी टीका लिखिता। तां स लध्वी विवृतिम् उद्घोषयति। पुषेंमहाभागस्य महद्ग्रन्थस्य हिन्द्यनुवचनम् आचार्येण नरेन्द्रदेवेन कृतं यत् हिन्दुस्तानी अकादमी, इलाहाबादतः प्रकाशितम्।

प्रस्तुते ग्रन्थे आचार्यवसुबन्धुकृता अष्टनवत्युत्तरपञ्चशतसङ्ख्यकाः सर्वाः कारिकाः राहुलसांकृत्यायनकृता नालन्दिकाटीका च सन्निवेशिताः। अस्य ग्रन्थस्य प्रकाशनं महापण्डितेन स्वयमेव 1932 मिते ईसवीये संवत्सरे काशीविद्यापीठवाराणसीतः कृतम्। तत्पश्चात् साम्प्रतम् अस्य प्रकाशनम् अस्माकं नवदेहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन मानितविश्वविद्यालयेन क्रियते। सम्पादनं च आचार्येण सङ्घसेनसिंहेन कृतम्। भारतीयदर्शनमर्मज्ञेषु अस्य ग्रन्थस्य समादरो भविष्यतीति आशास्महे।

31.12.2010

**त्रिपाठी राधावल्लभः**

# विषय-सूची


| | | पृष्ठ |
|---|---|---|
| (क) | पुरोवाक् (कुलपतेः राधावल्लभत्रिपाठिनः) | *iii* |
| (ख) | महापण्डितो राहुलः सांकृत्यायनः - जीवनवृत्तम् | *v* |
| (ग) | समर्पणम् (राहुल सांकृत्यायनस्य) | *vii* |
| (घ) | संज्ञापनम् (राहुल सांकृत्यायनस्य) | *viii* |
| (ख) | सम्पादकीयं वक्तव्यम् (संघसेनसिंहस्य) | *ix* |
| (ङ) | भूमिका (राहुल सांकृत्यायनस्य) | *xxv* |
| 1. | धातु-निर्देशः | 1-8 |
| 2. | इन्द्रिय-निर्देशः | 9-20 |
| 3. | लोकधातु-निर्देशः | 21-35 |
| 4. | कर्म-निर्देशः | 36-54 |
| 5. | अनुशय-निर्देशः | 55-66 |
| 6. | आर्यपुद्गल-निर्देशः | 67-80 |
| 7. | ज्ञान-निर्देशः | 81-91 |
| 8. | ध्यान-निर्देशः | 92-98 |
| 9. | पुष्पिका | 98-99 |
| 10. | कारिकानुक्रमणिका | 100-111 |
| 11. | राहुल सांकृत्यायन-पूरित-कारिकांशानां सूची | 112-119 |
| 12. | शब्दानुक्रमणिका | 120-152 |
| 13. | कारिकानुक्रमणिका (राहुल सांकृत्यायन-संशोधिताद् अभिधर्मकोशात् तत्प्रणीत-नालन्दिकाख्यटीकातश्च समुद्धृताः कारिकाः) | 153-170 |
| 14. | पूर्वप्रकाशित (काशीविद्यापीठतः प्रकाशित) शीर्षक-समर्पण-संज्ञापन-भूमिका-पृष्ठानां छायाकृतिरूपिण्योऽनुकृतयः | 171-199 |
| 15. | प्रतिकोशस्थानं तालिका चित्राणि | |

इति अचित्तकः अथवा यस्य (निरोधादिसमापत्तिषु 2/42) चित्तचैत्ता निरुद्धाः। तस्य विक्षिप्ताचित्तकस्य यः कुशलाकुशलोऽव्याकृतो धर्मः महाभूतहेतुकः नित्यप्रवाहयुक्तः सैव अविज्ञप्तिः।

**भूतानि पृथिवीधातुरप्तेजोवायुधातवः।**

पृथिवीधातुः, आपोधातुः, तेजोधातुः, वायुर्धातुरिति चत्वारि भूतानि। धारणाद्धातवः। सर्वेषां अन्यरूपाणां आश्रयत्वात् महाभूतानीत्यप्येषां संज्ञा।

**धृत्यादि-कर्मसंसिद्धाः खर-स्नेहोष्णतेरणाः ॥ 12 ॥**

धृतिः = स्थैर्यं, संग्रहः = समूहापादनं, पक्तिः = पाकक्रिया, व्यूहनं = वृद्धिः = प्रसर्पणमिति। एभिः धृति-संग्रह-पक्ति-व्यूहनक्रियाभिः यथासंख्यं पृथिवी-जल-तेजो-वायूनां चतुर्णां धातूनां सिद्धिर्भवति। तत्र पृथिवीधातुः खर (=कठिन) स्वभावः, आपोधातुः स्नेहन (आर्द्रीकरण) स्वभावः, तेजोधातुः उष्णतास्वभावः, वायुधातुः ईरण (=गति) स्वभावः।

**पृथिवी वर्ण-संस्थानं उच्यते लोकसंज्ञया।**

लोकसंज्ञया या पृथिवीत्युच्यते सा वर्ण-संस्थानमेव। वर्णा लोहितादयः, संस्थानानि दीर्घादीनि। पृथिवी वर्ण-संस्थानतो न भिन्ना, तत्स्वरूपैव।

**आपस्तेजश्च;**

पृथिवीवत् आपोधातुः, तेजोधातुश्च वर्ण-संस्थानस्वरूपौ।

**वायुस्तु धातुरेव तथाऽपि च ॥ 13 ॥**

तु शब्दः शंकास्थानपरिवर्जनार्थः। वायुधातुरपि पृथिव्यादिवत् वर्ण-संस्थानरूपः। अतएव लोके कृष्णो वायुः, चक्ररूपो वायुरिति व्यवहारः। सर्वमिदं रूपस्कन्धान्तर्गतम्। तत्र रूपविषय उक्तं भगवता—"रुप्पतीति खो भिक्खवे, तस्मा रूपं ति वुच्चति। केन रुप्पति? सीतेन..." (संयुत्त० 3/1/8/7)। अत्र 'रुप्पति' लुप्यते बाध्यत इत्यर्थः। तथाहि अट्ठकवग्गे—

"तस्स कामयमानस्स छन्दजातस्स जन्तुनो।
ते कामा परिहायन्ति सल्लविद्धो व रुप्पति॥"

(सुत्तनिपात 4/1)

'रुप्पति' संपीड्यते बाध्यत इत्यर्थः।

**इन्द्रियार्थास्त एवेष्टा [दशायतन-धातवः]।**

तानि एव इन्द्रियाणि विषयाश्च, दश आयतनानि दश धातव इत्युच्यन्ते। दश आयतनानि—चक्षुरायतनं, रूपायतनं, श्रोत्रायतनं, शब्दायतनं, घ्राणायतनं, गन्धायतनं, जिह्वायतनं रसायतनं, कायायतनं, स्प्रष्टव्यायतनमिति। दश धातवश्च—चक्षुर्धातुः, रूपधातुः ... कायधातुः, स्प्रष्टव्यधातुश्चेति।

**वेदनाऽनुभवः;**

अनुभूतिः (=उपभोगः) एव वेदनास्कन्धः।

**संज्ञा निमित्तोद्ग्रहणात्मिका ॥ 14 ॥**

निमित्तं—नीलपीत-दीर्घह्रस्व-पुरुषस्त्री-शत्रुमित्र-शाताऽशात (परिच्छेद) स्वभावाः। तेषां तद्ग्रहणं (मनसिधारणं) एव स्वरूपं संज्ञास्कन्धस्य।

**[संस्कारस्कन्ध] श्चतुर्भ्योऽन्ये [संस्काराः];**

रूप-वेदना-संज्ञा-विज्ञानेभ्यश्चतुर्भ्यः स्कन्धेभ्यो व्यतिरिक्ताः संस्काराः संस्कारस्कन्धः।

**त इमे**
**[त्रयः]।**

**धर्मा-ऽऽयतन-धात्वाख्याः सहाऽविज्ञप्त्य-संस्कृतैः ॥ 15 ॥**

अविज्ञप्तिः, असंस्कृतं, धर्मायतनधातुश्चेति इमे त्रयः संस्कारस्कन्धभेदाः।

अविज्ञप्तिः, वेदनास्कन्धः, संज्ञास्कन्धः, संस्कारस्कन्धः, आकाशं, प्रतिसंख्यानिरोधः, अप्रतिसंख्यानिरोध इति सप्त द्रव्याणि। सप्तद्रव्यकश्च धर्मधातुः।

**विज्ञानं प्रतिविज्ञप्तिः;**

विषयं विषयं प्रति उपलब्धिरेव विज्ञानस्कन्धः। स च षड्विधः—चक्षुर्विज्ञानं, श्रोत्रविज्ञानं, जिह्वाविज्ञानं, कायविज्ञानं, मनोविज्ञानं च।

**मनआयतनं च तत्।**

मनइन्द्रियमेव मनआयतनम्।

**[मताः ते धातवः सप्त][1] षड्विज्ञानान्यथो मनः ॥16॥**

षड् विज्ञानकायाः—चक्षुर्विज्ञानं...मनोविज्ञानधातवः, सप्तमश्च मनोधातुरिति सप्त प्रसिद्धा धातवः।

**षण्णां अनन्तराऽतीतं विज्ञानं यद्धि तन्मनः।**

चक्षुः-श्रोत्र-घ्राण-जिह्वा-काय-मनोविज्ञानानां अनन्तरं अतीतं (पूर्वकालिकं) च यद्विज्ञानं तदेव मन इत्युच्यते। यथा एक एव पुरुषः पिताऽपि पुत्रोऽपि; एकमेव बीजं धान्यमपि बीजमपि।

**षष्ठाश्रयप्रसिद्ध्यर्थं;**

चक्षुर्विज्ञानादीनां पंचानां सन्ति चक्षुरादयः पंच आश्रयाः। षष्ठस्य मनोविज्ञानस्य तु न कोऽप्याश्रयः प्रसिद्धः, तदर्थं मनसो ग्रहणम्।

1. अत्र पूसिन् महोदयस्य पाठः—'सप्तधातवश्चमतम्' इति।



राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058